# Satyavrataproktam Rudramantravyakhyavarnanam

# સત્યવ્રતપ્રોક્તં રુદ્રમન્ત્રવ્યાખ્યાવર્ણનમ્

## Document Information

Text title : Satyavrataproktam Rudramantravyakhyavarnanam

File name : rudramantravyAkhyAvarNanam.itx

Category : shiva, shivarahasya, mantra

Location : doc_shiva

Transliterated by : Ruma Dewan

Proofread by : Ruma Dewan

Description/comments : shivarahasyam | harAkhyaH tRitIyAMshaH | uttarArdham | adhyAyaH 39 | 72-89 ||

Latest update : January 30, 2024

Send corrections to : sanskrit at cheerful dot c om

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

February 1, 2024

*sanskritdocuments.org*

# સત્યવ્રતપ્રોક્તં રુદ્રમન્ત્રવ્યાખ્યાવર્ણનમ્

સત્યવ્રતઃ -
સન્તિ ધર્માઃ શ્રુતિપ્રોક્તાઃ પુરાણોક્તાશ્ચ કોટિશઃ ।
તેષુ ધર્મેષુ સર્વેષુ ધર્માઃ પઞ્ચ મનોહરાઃ ॥ ૭૨॥

વિભૂતિધારણં ધર્મઃ તથા રુદ્રાક્ષધારણમ્ ।
રુદ્રાધ્યાયજપો લિઙ્ગે બિલ્વૈઃ શાઙ્કરપૂજનમ્ ॥ ૭૩॥

પઞ્ચમં શિવનૈવેદ્યભોજનં તૈઃ પરં નરઃ ।
કૃતૈર્મુક્તો ભવત્યેવ મહાપાતકકોટિભિઃ ॥ ૭૪॥

નારીણાં ચ નરાણાં ચ ધર્મોઽયં તુલ્ય ઇત્યતઃ ।
અવિશેષેણ કર્તવ્યઃ સર્વેષામપિ સર્વથા ॥ ૭૫॥

રુદ્રાધ્યાયજપે શક્તિઃ સ્ત્રીણાં યદિ ન સર્વથા ।
તદા પઞ્ચાક્ષરો જપ્યઃ વેદસારતયા સ્મૃતઃ ॥ ૭૬॥

દધિમન્થનસમ્પ્રાપ્તનવનીતનિભં વિદુઃ ।
પઞ્ચાક્ષરમહામન્ત્રં વેદરાશિવિનિર્ગતમ્ ॥ ૭૭॥

અયં મન્ત્રઃ પરો મન્ત્રઃ સર્વમન્ત્રોત્તમોત્તમઃ ।
મન્ત્રરાજાધિરાજોઽયં મન્ત્રરત્નમિતિ સ્મૃતઃ ॥ ૭૮॥

વેદૈઃ પરમયં મન્ત્રો જપ્તઃ પઞ્ચાક્ષરઃ પરઃ ।
મહેશ્વરેણ જપ્તોઽયં જપ્તોઽપ્યમ્બિકયા મુદા ॥ ૭૯॥

કુમારેણાપિ જપ્તોઽયં ગણેશેનાપિ સાદરમ્ ।
શ્રીકાલભૈરવેણાપિ જપ્તઃ પઞ્ચાક્ષરઃ પરમ્ ॥ ૮૦॥

વીરભદ્રેણ જપ્તોઽયં નન્દિકેશેન સાદરમ્ ।
સભૃઙ્ગિપ્રમુખૈઃ સર્વૈઃ ગણૈર્જપ્તઃ સ કિન્નરૈઃ ॥ ૮૧॥

ગન્ધર્વૈઃ પરિજપ્તોઽયં સકલત્રૈશ્ચ પન્નગઃ ।

નારાયણેન જપ્તોઽયં જપ્તોઽયં રમયા મુદા ॥ ૮૨॥

બ્રહ્મણાપિ સરસ્વત્યા જપ્તોઽયં પરમો મનુઃ ।
ઇન્દ્રેણ જપ્તઃ શચ્યા ચ ચન્દ્રેણાપિ પ્રયત્નતઃ ॥ ૮૩॥

અગ્નિનાપિ પ્રજપ્તોઽયં સ્વાહયાપિ પ્રયત્નતઃ ।
વાયુનાપિ પ્રજપ્તોઽયં ભૂમ્યા જપ્તો વિશેષતઃ ॥ ૮૪॥

યમેનાપિ પ્રજપ્તોઽયમન્યૈશ્ચાપિ સુરૈસ્તથા ।
દધીચિપ્રમુખૈઃ સર્વૈઃ જપ્તોઽયં મુનિભિઃ સદા ॥ ૮૫॥

અયમેવ પરો મન્ત્રઃ સર્વેષાં મોક્ષદાયકઃ ।
સૂર્યેણ વાયુના જપ્તશ્ચન્દ્રેણાપિ પ્રયત્નતઃ ॥ ૮૬॥

પઞ્ચાક્ષરકારસુધાસમુદ્રં કૃત્વા મહારુદ્રમિવાપરં તમ્ ।
કો વા ન તન્મન્ત્રજપાનુરક્તઃ ત્યક્ત્વા પશુઘ્નં કૃતપાપરાશિમ્ ॥ ૮૭॥

ઇતોઽધિકઃ કોઽપિ ન વેદમધ્યે મન્ત્રોઽસ્તિ મન્ત્રાધિપ એવ સોઽયમ્ ।
અયં સ્મૃતશ્ચેન્મરણાવસાને મુક્તિઃ પરં કિં ન કરપ્રપન્ના ॥ ૮૮॥

મન્ત્રેષ્વયં શામ્ભવમન્ત્રરાજરાજાધિરાજઃ ખલુ શૈવમન્ત્રઃ ।
અતઃ સ એવામિતપુણ્યહેતુઃ સ એવ મોક્ષાય વિનિર્મિતોઽપિ ॥ ૮૯॥

॥ ઇતિ શિવરહસ્યાન્તર્ગતે સત્યવ્રતપ્રોક્તં રુદ્રમન્ત્રવ્યાખ્યાવર્ણનં સમ્પૂર્ણમ્ ॥

- ॥ શ્રીશિવરહસ્યમ્ । હરાખ્યઃ તૃતીયાંશઃ । ઉત્તરાર્ધમ્ । અધ્યાયઃ ૩૯। ૭૨-૮૯ ॥

- .. shrIshivarahasyam . harAkhyaH tRRitIyAMshaH . uttarArdham . adhyAyaH 39. 72-89 ..

Proofread by Ruma Dewan

---

*Satyavrataproktam Rudramantravyakhyavarnanam*

pdf was typeset on February 1, 2024

Please send corrections to *sanskrit@cheerful.com*